श्रावणस्याष्टमी कृष्णा तथाषाढ़स्य पूर्णिमा ।
कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी सिता ॥
मन्वन्तरादयस्त्वेता दत्तस्याक्षयकारिकाः" ।
अत्र अमावास्याष्टमीव्यतिरिक्ताः शुक्लाः पुनः-
पुनस्तथापदोपात्तकीर्त्तनादानात् । उपक्रमोपसंहा-
रयोः शुक्लत्वकीर्त्तनाच्च ॥ अत्र कामधेनौ तृतीया
चैव माघस्येति । कल्पतरौ तु तृतीया चैत्रमास-
स्येति लिखितं । अत्र पाठद्वैधे श्रीपतिरत्नमा-
लायां । "अश्वयुजि शुक्लनवमी द्वादश्यूर्ज्जे मधौ
तृतीया च" । इति पाठाच्चैत्रतृतीयैव ग्राह्या ।
श्रीदत्तोऽप्येवं। माघसप्तम्याश्चान्यत्वं सौरागमेऽपि ।
"अर्कपत्रैः सबदरैर्दूर्व्वाक्षतसचन्दनैः ।
अष्टाङ्गविधिना चार्घ्यं दद्यादादित्यतुष्टये ॥
माघेऽथ फाल्गुने वापि भवेद्वै माघसप्तमी ।
माकरीति च यत्प्रोक्तं तत्रायोदृक्तिदर्शनात्" ॥
अष्टाङ्गविधिना ।
"योऽष्टाङ्गमर्घ्यमापूर्य्य भानोर्मूर्ध्नि निवेदयेत् ।
ताम्रपात्रार्घ्यदानेन पुण्यं दशगुणं स्मृतं" ॥
इति भविष्यपुराणीयेन । आदित्यपुराणे ।
"ऋक्षराशिविशेषेण यत्कर्म्म विहितं नरैः ।
दैवं वाप्यथवा पैत्र्यं तदन्यत्रापि दृश्यते" ॥ * ॥
अर्घ्यमन्त्रस्तु ।
"जननी सर्व्वभूतानां सप्तमी सप्तसप्तिके ।
सप्तव्याहृतिके देवि ! नमस्ते रविमण्डले" ॥
प्रणाममन्त्रस्तु ।
"सप्तसप्तिवहप्रीत सप्तलोकप्रदीपन ।
सप्तम्यां हि नमस्तुभ्यं नमोऽनन्ताय वेधसे" ॥
सप्तिरश्वः । इति तिथ्यादितत्त्वं ॥

अरुणोपलः, पुं, (अरुणः उपलः, कर्म्मधारयः ।) रक्तवर्णमणिविशेषः । चुनी इति भाषा । तत्पर्य्यायः । पद्मरागः २ लोहितकः ३ लक्ष्मीपुष्पः ४ । इति हेमचन्द्रः ॥

अरुन्तुदः, त्रि, (अरूंषि मर्म्माणि तुदति, तुद + खश् + मुम् च ।) मर्म्मपीड़कः । तत्पर्य्यायः । मर्म्मस्पृक् २ । इत्यमरः ॥ (परुषः । कठोरः । श्रवणकटुः । "माकन्दं मकरन्दतुन्दिलममुं गाहस्व काकः स्वयं कर्णारुन्तुदमन्तरेण रणितं त्वां मन्महे कोकिलं" । इति भामिनीविलासे । मर्म्मपीड़ाकरः । हृदयग्रन्थिरूपमर्म्मस्थानस्पर्शकारी । यथा,
"नारुन्तुदः स्यादार्त्तोऽपि न परद्रोहकर्म्मधीः" ।
इति मनुः ।
"तीक्ष्णा नारुन्तुदा बुद्धिः कर्म्म शान्तं प्रतापवत्" ।
इति माघः ।
"अरुन्तुदमिवालानमनिर्व्वाणस्य दन्तिनः" ।
इति रघुवंशे ।)

अरुन्धती, स्त्री, (न रुन्धती ।) वशिष्ठपत्नी । तत्पर्य्यायः । अक्षमाला २ । इति हेमचन्द्रः ॥ सा कर्दममुनिकन्या महासाध्वी । इति श्रीभागवतं ॥ आकाशे सप्तर्षिमध्ये वशिष्ठसन्निधौ तस्या उदयः । गतायुषस्तां न पश्यन्ति । (यदुक्तं,—
"दीपनिर्व्वाणगन्धञ्च सुहृद्वाक्यमरुन्धतीं ।
न जिघ्रन्ति न शृण्वन्ति न पश्यन्ति गतायुषः" ॥
यथा च सुश्रुते,—
"न पश्यति स नक्षत्रां यश्च देवीमरुन्धतीं ।
ध्रुवमाकाशगङ्गां वा तं वदन्ति गतायुषं" ॥)
सप्तपदीगमनानन्तरं जामाता मन्त्रं पाठयन् वधूं तां दर्शयति च ॥

अरुन्धतीजानिः, पुं, (अरुन्धती जाया यस्य सः, निङ् ।) वशिष्ठमुनिः । इति हेमचन्द्रः ॥

अरुन्धतीनाथः, पुं, (अरुन्धत्या नाथः, षष्ठीतत्पुरुषः ।) वशिष्ठमुनिः । इति त्रिकाण्डशेषः ॥

अरुष्कः, पुं, (अरुर्म्मर्म्मस्थानं कायति पीड़यति, कै + क ।) भल्लातकवृक्षः इति शब्दरत्नावली ॥

अरुष्करं, क्ली, (अरुः करोति अरु + कृ + ट, उपपदसमासः षत्वं ।) भल्लातकफलं । इति हेमचन्द्र ॥

अरुष्करः, पुं, (अरुः करोति, अरुः + कृ + ट, षत्वं उपपदसमासः ।) भल्लातकवृक्षः । इति शब्दरत्नावली ॥

अरुष्करः, त्रि, ( अरुः करोति, अरुः + कृ + ट, षत्वं, उपपदसमासः ।) व्रणकरः । क्षतकारकः । इति मेदिनी ॥

अरुहा, स्त्री, ( रोहति, रुह + क, नञ्समासः । ) भूधात्री । इति राजनिर्घण्टः ॥ भूमि आमला इति ख्याता ।

अरूपः, त्रि, (नास्ति रूपमस्य ।) रूपशून्यः । यथा । "अरूपवातातीसारादाविवारुण्यं" । इति रक्षितः ॥ कुत्सितरूपः ।
("इमामरूपामसतीं भक्षयिष्यामि मानुषीम्" । इति रामायणे ।)

अरूषः, पुं, (ऋ + ऊषन् ।) सर्पविशेषः । इत्युणादिकोषः ॥ सूर्य्यः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

अरे, व्य, (ऋ + ए ।) नीचसम्बोधनं । इति हेमचन्द्रः ॥ ओरे इति भाषा । अपाकृतिः । असूया । इति मेदिनी ॥ (रोषाह्वाने । अपकृतौ । "अरे चेतोमीन ! भ्रमणमधना यौवनजले त्यज त्वं स्वच्छन्दं युवतिजलधौ पश्यसि न किम्" । इति शान्तिशतके । "अरे अनुघ्नन् ! निरपराधराजकुलकदन महापातकिन् अशिष्टविकृतचेष्ट !" इति महावीरचरिते ।)

अरेरे, व्य, (अरे + वीप्सायां द्विरुक्तिः ।) अधमसम्बोधनं । इति जटाधरः ॥ सक्रोधाह्वानं । इति शब्दमाला ॥

अरोकः, त्रि, (रुच् + घञ्, नञ्समासः ।) निष्प्रभः । दीप्तिरहितः । इत्यमरः ॥ रोकश्छिद्रन्तद्रहितश्च ॥

अरोचकः, पुं, ( न रोचयति प्रीणयति, रुच + णिच् + ण्वुल्, नञ्समासः ।) रोगविशेषः । अरुचिरोग इति भाषा । तस्य निदानरूपे ।
"वातादिभिः शोकभयातिलोभ-
क्रोधैर्मनोघ्नाशनरूपगन्धैः ।
अरोचकाः स्युः परिहृष्टदन्तः
कषायवक्त्रोऽस्य मतोऽनिलेन ॥
कट्वम्लमुष्णं विरसञ्च पूति
पित्तेन विद्याल्लवणञ्च वक्त्रं ।
माधुर्य्यपैच्छिल्यगुरुत्वशैत्य-
विबद्धसम्बन्धयुतं कफेन" ॥ इति माधवकरः ॥
अरोचकाः न भोजने रुचिमुत्पादयन्तीत्यरोचका व्याधयः पञ्च वातजादिभेदैः ॥ * ॥ वातिकस्य लक्षणमाह । परिहृष्टदन्तः अम्लभक्षणेनेव परिहृष्टो दन्तो यत्र सः । तथा कषायवक्त्रः । कषायरसं वक्त्रं यत्र सः ॥ * ॥ पैत्तिकमाह ।
"कट्वम्लमुष्णं विरसञ्च पूति
पित्तेन विद्याल्लवणञ्च वक्त्रं" ।
कट्वम्लमित्यादिना विद्यादित्यन्तेन पैत्तिकस्य लक्षणं ॥ * ॥ श्लैष्मिकमाह । लवणञ्च वक्त्रं कफजलक्षणेन पठनीयः । यतो विदग्धः श्लेष्मा लवणभावमुपैति ।
"माधुर्य्यपैच्छिल्यगुरुत्वशैत्य-
स्निग्धत्वदौर्गन्ध्ययुतं कफेन" ।
पैच्छिल्यं मुखस्याभ्यन्तरे । स्निग्धत्वं वहिः ॥ * ॥ आगन्तुजमाह ।
"अरोचके शोकभयातिलोभात्
क्रोधाद्यहृद्याशुचिगन्धजे स्यात् ।
स्वाभाविकं चास्यमथारुचिश्च
त्रिदोषजे नैकरसम्भवेच्च" ॥
क्रोधादित्यादिशब्देनाहृद्ययोरशनरूपयोर्ग्रहणं । स्वाभाविकं । अविकृतरसं ॥ * ॥ त्रिदोषजमाह । नैकरसं अनेकरसमास्यं स्यात् । वातजादिभेदेन मुखे विकृतिमभिधायान्यदेशे विकृतिमाह ।
"हृच्छूलपीड़नयुतं पवनेन पित्तात्
तृड्दाहचोषबहुलं सकफप्रसेकं ।
श्लेष्मात्मकं बहुरुजं बहुभिश्च विद्यात्
वैगुण्यमोहजड़ताभिरथापरञ्च" ॥
हृच्छूलपीड़नयुतं हृदि शूलेन पीड़नं तेन युतं । चोषः पार्श्वस्थिताग्निनेव सन्तापः । बहुभिस्त्रिभिर्दोषैः । बहुरुजं उक्तवातादिरोगयुक्तं । वैगुण्यं मनसो व्याकुलत्वं । जड़ता शून्याङ्गता । अपरं आगन्तुजं । भक्तद्वेषाभक्तच्छन्दौ चरकसुश्रुताभ्यामरोचकत्वेनैव संगृहीतौ ॥ * ॥ वृद्धभोजस्त्वेषां लक्षणानि पृथगाह ।
"प्रक्षिप्तन्तु मुखे चान्नं यत्र नास्वादते नरः ।
अरोचकः स विज्ञेयो भक्तद्वेषमतः शृणु" ॥
आस्वादते अन्नस्य मिष्टतां न प्राप्नोति । तदन्नं मिष्टं न लगति इति यावत् ।
"चिन्तयित्वा तु मनसा दृष्ट्वा स्पृष्ट्वा च भोजनं ।
द्वेषमायाति योजन्तुर्भक्तद्वेषः स उच्यते ॥
कुपितस्य भयार्त्तस्य तथा भक्तनिरोधतः ।
यत्र नान्ने भवेच्छ्रद्धः सोऽभक्तच्छन्द उच्यते" ॥ * ॥
अथारोचकस्य चिकित्सा ।
"भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणं ।
रोचनं दीपनं वह्नेर्जिह्वाकण्ठविशोधनं ॥ १ ॥
शृङ्गवेररसञ्चापि मधुना सह योजयेत् ।
अरुचिश्वासकासघ्नं प्रतिश्यायकफापहं ॥ २ ॥
पक्वाम्लिका सिता शीतवारिणा वस्त्रगालिता ।